संस्कृतम्

# अभ्यासपुस्तकम्

अष्टमी कक्ष्या

സംസ്കൃതം

# അഭ്യാസപുസ്തകം

ക്ലാസ് 8

സംസ്കൃതവിഭാഗം
പൊതുവിദ്യാഭ്യാസവകുപ്പ്
കേരള സർക്കാർ

2017

नाम ..........................................................................

संस्कृतम्
STD - VIII

**प्रथमः पाठः - विभातम्।**

1.**मातृकानुसारं पदविश्लेषणं कुरुत।**

१. सूर्यस्तापितकनकारुणकिरणः = सूर्यः + तापितकनकारुणकिरणः।

(विसर्गस्य सकारः)

बालस्तावत् =

बालस्त्वम् =

२. समुत्थितोऽस्मि = समुत्थितः + अस्मि।

(विसर्गसन्धिः)

प्रशान्तशीतलसमयोऽद्य =

रामोऽपि =

३. अस्म्यत्र = अस्मि + अत्र (इ+अ=य)।(यण्सन्धिः)

इत्यपि =

इत्यत्र =

४. जगतामीशस्य = जगताम् + ईशस्य।

कवितामीदृशीम् =

लतामपि =

५. बहिरागच्छामि = बहिः + आगच्छामि।

(विसर्गस्य रेफः)

कविरपि =

मुनिरपि =

६. अद्यात्र = अद्य + अत्र (अ + अ = आ)।

(सवर्णदीर्घसन्धिः)

तत्रापि =

कुत्रास्ति =

नाम ..............................................................................



**2.प्रदत्तानां पदानां समानार्थकपदानि मञ्जूषातः चित्वा लिखत।**

(प्रभातं, शनैः, रात्रिः, समूहः, स्वर्णं, दिनकरः, चेतसा, सहितः, अनिलः, शय्या, सुखं, पुष्पं, कुक्कुटः, भ्रमरः, अत्यन्तं, स्वापः, रश्मिः, ससन्तोषं, लोकम्, नक्षत्रम्)

| | | | |
|---|---|---|---|
| रजनी | - | समुदम् | - |
| तारा | - | विभातम् | - |
| गणः | - | समेतः | - |
| सूर्यः | - | पवनः | - |
| कनकम् | - | तल्पम् | - |
| किरणः | - | सौख्यम् | - |
| निद्रा | - | मन्दम् | - |
| जगत् | - | मनसा | - |
| नितराम् | - | मधुपः | - |
| सुमम् | - | कलाविकः | - |

**3.मातृकानुसारं क्रियापदानाम् उचितरूपाणि पूरयत।**

| | | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| १. | प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| | मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| | उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः। |
| २. | प्रथमपुरुषः | गायति | ——— | गायन्ति |
| | मध्यमपुरुषः | ——— | गायथः | गायथ |
| | उत्तमपुरुषः | गायामि | ——— | गायामः। |

नाम ..........................................................................



| | | | | |
|---|---|---|---|---|
| ३. | प्रथमपुरुषः | ——— | पश्यतः | ——— |
| | मध्यमपुरुषः | पश्यसि | ——— | पश्यथ |
| | उत्तमपुरुषः | ——— | पश्यावः | ———। |
| ४. | प्रथमपुरुषः | करोति | ——— | कुर्वन्ति |
| | मध्यमपुरुषः | करोषि | ——— | कुरुथ |
| | उत्तमपुरुषः | ——— | कुर्वः | कुर्मः। |
| ५. | प्रथमपुरुषः | अस्ति | स्तः | ——— |
| | मध्यमपुरुषः | ——— | स्थः | स्थ |
| | उत्तमपुरुषः | ——— | स्वः | स्मः। |
| ६. | प्रथमपुरुषः | ——— | दत्तः | ददति |
| | मध्यमपुरुषः | ——— | दत्थः | दत्थ |
| | उत्तमपुरुषः | ——— | दद्वः | दद्मः। |

नाम ..........................................................................



**अधोदत्तां पट्टिकां पठतु।**

| | | | |
|---|---|---|---|
| उदा - **प्रथमपुरुषः** | बालः गच्छति | बालौ गच्छतः | बालाः गच्छन्ति |
| **मध्यमपुरुषः** | त्वं गच्छसि | युवां गच्छथः | यूयं गच्छथ |
| **उत्तमपुरुषः** | अहं गच्छामि | आवां गच्छावः | वयं गच्छामः। |

4.**प्रदत्तानां क्रियापदानाम् उचितानि पुरुषवचनरूपाणि उपयुज्य पूरयत।**

(गच्छति, करोति, आगच्छति, पश्यति, पिबति, गायति, वाति, ददाति, अस्ति, नमति, त्यजति)

१. बालकाः विद्यालयं ————।

२. अहं नद्यां स्नानं ———— ।

३. धनिकः भिक्षुकाय धनं ———— ।

४. त्वं कुतः ———— ।

५. बालकाः चलच्चित्रं ———— ।

६. अहं जलं ———— ।

७. ललिता सुन्दरं गानं ————।

८. उद्याने बहूनि पुष्पाणि ————।

९. वयं पलास्तिकवस्तूनि ————।

१०. यूयं ईश्वरं ————।

नाम ..............................................................................

5.**कवितां पठित्वा प्रश्नानाम् उत्तरं लिखत। (प्रथमः पाठे ८ पुटम्)**

- का गच्छति ? ______________
- कीदृशी रजनी ? ______________
- रजनी कथं गच्छति ? ______________
- कः अभ्यागच्छति ? ______________
- कीदृशः सूर्यः ? ______________
- कः समुत्थितः ? ______________
- प्रथमं कस्य पादस्मरणं करोति ? ______________
- किं कृत्वा बहिरागच्छति ? ______________
- किं पश्यति ? ______________
- के पिबन्ति ? ______________
- किं पिबन्ति ? ______________
- कथं पिबन्ति ? ______________
- किं कृत्वा पिबन्ति ? ______________
- कः गायति ? ______________
- किं गायति ? ______________

नाम ..............................................................................

- कथं गायति ? ____________________
- कः वाति ? ________________________
- कीदृशः मृदुपवनः ? ________________
- कः ददाति ? __________________
- किं ददाति ? ____________________
- कस्मै ददाति ? ______________________

6.**कोष्ठके प्रदत्तानां पदानां स्थाने पाठभागस्थानि पदानि उपयुज्य रिक्तस्थानानि पूरयत।**

(नक्षत्रगणसहिता रात्रिः) _______ मन्दं मन्दं गच्छति। तापितकनकारुणकिरणः _______ (दिनकरः) अभ्यागच्छति। अत्र _______ (स्वापं) त्यक्त्वा _______ (स्वकीयशय्यायाः) समुत्थितः अस्मि। प्रथमं _______ (लोकनाथस्य) पादस्मरणं करोमि। मातापितरौ ________ (चेतसा) नत्वा बहिरागच्छामि। प्रभातसन्ध्यासुन्दरदृश्यं ________ (अत्यन्तं) पश्यामि। _______ (भ्रमराः) _______ (ससन्तोषं) _______ (पुष्पात् पुष्पं) गत्वा मधुरं पिबन्ति। _________ (कुक्कुटः) सन्तुष्ट्या प्रभातभूपालं _______ (आलपति)।

7.**कवितारचना।**

नाम ..........................................................................



**द्वितीयः पाठः - कोऽरुक्।**

1.**उदाहरणानुसारं पदानां विश्लेषणं कुरुत।**

| | | | | |
|---|---|---|---|---|
| कोऽरुक् | = | कः | + | अरुक्। |
| अन्यतमोऽस्ति | = | —— | + | ———। |
| सोऽरुक् | = | ——— | + | ———। |
| गताविव | = | गतौ | + | इव। (औ + स्वरः = आव्) |
| समर्थावपि | = | ———— | + | —————। |
| तावपि | = | ———— | + | —————। |
| पठनमारभत | = | पठनम् | + | आरभत। |
| सर्वमपि | = | ———— | + | ———। |
| अमूल्यमेकं | = | ———— | + | ———। |

2.**उदाहरणानुसारं पदानि संश्लेषयत।**

| | | | | |
|---|---|---|---|---|
| पुत्रः | + | तु | = | पुत्रस्तु। (विसर्गस्य स आदेशः) |
| रोगः | + | तु | = | —————। |
| बालः | + | तु | = | —————। |
| तस्मिन् | + | अवसरे | = | तस्मिन्नवसरे। (नकारस्य द्वित्वम्) |
| अस्मिन् | + | एव | = | —————। |
| कस्मिन् | + | अपि | = | —————। |

नाम ...............................................................................



| | | | | |
|---|---|---|---|---|
| पुनः | + | अपि | = | पुनरपि। (विसर्गस्य रुत्वम्) |
| रीतिः | + | अपि | = | ________। |
| गतिः | + | अस्ति | = | ________। |

3.**पदानां समानार्थकपदानि यथोचितं योजयत।**

| | | | | |
|---|---|---|---|---|
| १. | रुक् | - | शब्दं कुर्वन्ति | ____________। |
| २. | रटन्ति | - | कपालं | ____________। |
| ३. | खगौ | - | रोगः | ____________। |
| ४. | मस्तकं | - | चिकित्सकः | ____________। |
| ५. | वैद्यः | - | पक्षिणौ | ____________। |

4.**रेखाङ्कितानि पदानि उत्तरत्वेन लब्धुमर्हान् प्रश्नान् निर्मातु।**

**(किं, कुत्र, कति, कथं, किमर्थं, कदा)**

१. नम्पी प्रतिदिनं कुलदेवतामन्दिरं गच्छति।

२. बालौ वैद्यस्य समीपम् आयुर्वेदपठनार्थम् आगच्छताम्।

३. द्वौ बालौ वैद्यस्य समीपम् आगतवन्तौ।

नाम .............................................................................

४. वैद्यपुत्रः निलीय सर्वं पश्यति स्म।

५. बालौ ग्रामीणं प्रकोष्ठमानीय औषधलेपनम् अकुरुताम्।

६. यदा वैद्यः प्रत्यागतः तदा वैद्यपुत्रः सर्ववृत्तान्तं पित्रे न्यवेदयत्।

5.**प्रश्नाः।**

१.

२.

३.

४.

५.

६.

6.**कथास्तम्भान् क्रमीकृत्य वाक्यानि कैरल्यां विवर्तयत।**

१. मस्तके औषधलेपनम् अकुरुताम्।
२. तौ शिष्यत्वेन स्वीकृत्य वैद्यः पाठनमारभत।
३. कोऽरुक् इति रटन्तौ खगौ अपश्यत्।
४. वैद्यपुत्रः सर्वमपि वृत्तान्तं पित्रे न्यवेदयत्।

नाम .....................................................................

**द्वितीयः पाठः - कोऽरुक्।**

५. आलत्तियूर् नम्पी अष्टवैद्यानां मध्ये प्रमुखं स्थानम् अवाप।

६. आलत्तियूर् नम्पी प्रतिदिनं कुलदेवतामन्दिरं गच्छति स्म।

७. कश्चन ग्रामीणः शिरोवेदनया वैद्यस्य गृहं प्राप्तवान्।

८. द्वौ बालौ वैद्यस्य समीपम् आयुर्वेदपठनार्थम् आगच्छताम्।

९. वैद्यपुत्रः निलीय सर्वं पश्यति स्म।

१०. गुरुदक्षिणारूपेण अमूल्यमेकं ग्रन्थं वैद्याय समर्पयताम्।

7.**कथास्तम्भं क्रमीकरोतु।**

8.**क्रमीकृतानि वाक्यानि कैरल्यां विवर्तयत।**

नाम ..........................................................................

9.**सम्भाषणांशान् पूरयत।**

वैद्यभवनात् गन्तुमिच्छतोः बालकयोः वैद्यस्य च सम्भाषणं संभाव्य लिखत।

बालौ - भो ! आर्य गन्तुमिच्छावः।

वैद्यः - ——— गन्तुमिच्छन्तौ ?

बालौ - अस्माकं चिकित्सारीतिं ज्ञातवान्।

वैद्यः - भवन्तौ ——— ?

बालौ - आवाम् अश्विनीकुमारौ।

वैद्यः - ——— आगतवन्तौ ?

बालौ - आयुर्वेदस्य प्रचारणार्थं आगतवन्तौ। (ग्रन्थं दत्वा) विजयी भव।

वैद्यः - धन्योऽस्मि।

**(कुतः, किमर्थं, कौ)**

10.**पाठभागं पठित्वा अव्ययपदानि चित्वा पट्टिकां कुरुत।**

| क्त्वाान्तम् | ल्यबन्तम् | तुमुन्नन्तम् | अन्यानि |
|---|---|---|---|
| श्रुत्वा | स्वीकृत्य | गन्तुम् | तु, यदा तदा<br>इति, च, एवं<br>पुनः, अपि, पुरा<br>तत्र, अत्र |

नाम ..........................................................................

11.**सूचनानुसारं कः आरोग्यवान् इति विषयमधिकृत्य टिप्पणिं लिखत।**

आरोग्यपरिपालने आहारस्य प्राधान्यम्। हितः मितः च आहारः। दिनचर्यायाः प्राधान्यम् आरोग्यस्य अधिष्ठानं शरीरम्।

12.**चिकित्सारीतिम् आचार्याणां नामानि च यथोचितं योजयत।**

| | | | | |
|---|---|---|---|---|
| १. आयुर्वेदः | - | हिप्पोक्राट्टिस् | - | ________ |
| २. अलोप्पति | - | सामुवल् हनिमान् | - | ________ |
| ३. होमियोप्पति | - | चरकः | - | ________ |
| ४. सिद्धचिकित्सा | - | एस्कुलिपियस् (Aesculapius) | - | ________ |
| ५. युनानि | - | अगस्त्यः | - | ________ |

नाम ..........................................................................

13.**आयुर्वेदचिकित्सामण्डले प्रसिध्दानाम् अष्टवैद्यानां नामानां चयनं कुरुत । (अन्तर्जालद्वारा)**

१. तैक्काट्ट् मूस् ।

२.

३.

४.

५.

६.

७.

८.

नाम ..............................................................................

**तृतीयः पाठः - सुखदो व्यायामः।**

1.**मातृकानुसारं पदविश्लेषणं कुरुत।**

| | | | | | |
|---|---|---|---|---|---|
| १. | अन्यतमस्यास्य | = | अन्यतमस्य | + | अस्य |
| | | | | | (सवर्णदीर्घसन्धिः) |
| | आसनस्यानुष्ठानेन | = | | + | |
| | आसनस्यास्य | = | | + | |
| २. | यमादयश्चत्वारः | = | यमादयः | + | चत्वारः |
| | | | | | (विसर्गसन्धिः) |
| | बालाश्चरन्ति | = | | + | |
| | ताश्च | = | | + | |

2.**मातृकानुसारं संश्लेषणं कुरुत।**

| | | | | |
|---|---|---|---|---|
| सत्यम् | + | अस्तेयम् | = | सत्यमस्तेयम्। |
| रामम् | + | इति | = | ————। |
| इदम् | + | आसनम् | = | ————। |
| सर्वेषाम् | + | आसनानाम् | = | ————। |

**तृतीयः पाठः - सुखदो व्यायामः।**

3.**पदानां समानार्थकपदानि यथोचितं योजयत।**

१. क्लमः - शरासनम् - ____________

२. श्रोणी - पृष्टास्थि - ____________

३. धनुः - क्षीणः - ____________

४. कशेरुका - मोचनम् - ____________

५. मुक्तिः - कटिप्रदेशः - ____________

4.**संभाषणं पूरयत। योगाचार्येण सह चर्चां कृत्वा संभाषणांशान् पूरयित्वा टिप्पणिं लिखत।**

छात्राः - नमस्ते। दर्शनानि कानि?

आचार्यः - सांख्यं, योगः, न्यायः, वैशेषिकं, पूर्वमीमांसा, उत्तरमीमांसा।

छात्राः - योगसूत्रं नाम ग्रन्थः केन विरचितः?

आचार्यः - ________ __________ __________

छात्राः - आसनस्य निर्वचनं किम्?

आचार्यः - ________ __________ __________

छात्राः - वज्रासनस्य प्रयोजनानि कानि?

आचार्यः - ________ __________ __________

छात्राः - धनुरासनस्य प्रयोजनानि कानि?

आचार्यः - ________ __________ __________

छात्राः - पद्मासनं किमर्थं करणीयम्?

आचार्यः - ________ ________ ________

छात्राः - आसनानाम् अन्ते अनुष्ठीयमानम् आसनं किम्?

आचार्यः - ________ ________ ________

छात्राः - धन्यवादः।

5.**संभाषणं पठित्वा योगशास्त्रम् अधिकृत्य टिप्पणिं लिखत।**

6.**प्रदत्ते प्रभाषणे रेखाङ्कितपदानि शोधयित्वा प्रभाषणं पुनर्लिखत।**

सर्वेभ्यो नमो नमः।

अहम् अद्य योगस्य प्राधान्यमधिकृत्य किञ्चित् वक्तुम् इच्छति। अधुनातनलोके अनेके जनाः विविधैः रोगैः पीडिताः भवति। आतुरालयानां संख्या वर्धन्ते। अत्र योगशास्त्रस्य प्रसक्तिः सन्ति। योगदर्शने पतञ्जलिमहर्षिः शरीरस्य मनसः च आरोग्याय उपायान् निर्दिशन्ति। अस्मिन् यम नियम आसन प्राणायाम प्रत्याहार धारणा ध्यान समाधिः इति अष्टाङ्गानि अस्ति। योगस्य अनुशीलनेन वयं सर्वे अरोगाः भवामि।

एवं सर्वे योगं स्वजीवने आचरन्तु, आरोग्यपूर्णाः भवन्तु इति प्रार्थयित्वा विरमामि।

सर्वे भवन्तु सुखिनः
सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु
मा कश्चित् दुःखभाग्भवेत्।।

धन्यवादः।

7.**प्रभाषणं पुनर्लिखतु।**

**तृतीयः पाठः - सुखदो व्यायामः।**

8.**उदाहरणानुसारं योगासनानि अधिकृत्य मुद्रागीतं रचयतु।**

१. कुरु योगविद्याम्

भव पुष्टगात्रः।

२. उन्मेष बल लाभाय

करोतु धनुरासनम्।

३. सर्वव्याधिविनाशाय

आचर योगासनं सदा।

४. कुरु ——— ————

अपनय प्रमेहम्।

५. मनः शरीरदृढतायै

———— ———— ——

६. क्लमापनयनाय

———— ——— ————

नाम ...........................................................................



## चतुर्थः पाठः - कृषिः सर्वार्थसाधिका ।

**1.मातृकानुसारं विश्लेषणं कुरुत ।**

| | | | | | |
|---|---|---|---|---|---|
| १. | कीटानपाकर्तुम् | = | कीटान् | + | अपाकर्तुम् । |
| | बालानपि | = | ____ | + | ______ । |
| | भवानपि | = | ____ | + | ______ । |
| २. | अवलम्ब्यैव | = | अवलम्ब्य | + | एव । (अ+ए=ऐ) |
| | स्वीकृत्यैव | = | _____ | + | ________ । |
| | समूहस्यैक्यम् | = | _____ | + | ________ । |

**2.मातृकानुसारं संश्लेषणं कुरुत ।**

| | | | | | |
|---|---|---|---|---|---|
| १. | बीजानि | + | उप्यन्ते | = | बीजान्युप्यन्ते । |
| | | | | | (इ+स्वराक्षराणि=य्) |
| | कर्मणि | + | उच्यन्ते | = | _______ । |
| | पुष्पसस्यानि | + | अपि | = | _______ । |
| २. | एतत् | + | अस्माकम् | = | एतदस्माकम् । |
| | | | | | (स्वराक्षरे परे खराक्षराणां वर्गतृतीयादेशः) |
| | तत् | + | अपि | = | _______ । |
| | कियत् | + | अत्र | = | _______ । |

नाम ..............................................................................



## चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।

3. **कैरल्यां प्रदत्तानां शाकानां संस्कृतनामानि शब्दकोशस्य साहाय्येन लिखत।**

| कैरल्यां नाम | संस्कृतनाम | कैरल्यां नाम | संस्कृतनाम |
|---|---|---|---|
| മത്തങ്ങ - | | മുളക് - | |
| ഉരുളക്കിഴങ്ങ് - | | ചെറുപയർ - | |
| വാഴപ്പഴം - | | തക്കാളി - | |
| കാബേജ് - | | പട്ടാണി - | |
| കോവക്ക - | | ചീര - | |
| പടവലം - | | വഴുതനങ്ങ - | |
| കോളിഫ്ളവർ - | | ചേന - | |
| വെണ്ടക്കായ - | | | |

4. **मञ्जुषातः पदानि चित्वा शाकानां पुष्पाणां फलानां च पट्टिकां रचयतु।**

सेवन्ती, अलाबुः, द्राक्षाफलम्, पाटलम्, सूरणम्, कदलीफलम्, जपाकुसुमम्, मरीचम्, आलुकम्, कर्णिकारम्, मल्लिका, सेवम्, गोस्तनी, दाडिमम्, पटोलः, वृन्दाकम्, कमलम्, मधुकर्कटी, रक्तफलम्, अनानसम्, पनसम्, पारन्ती, आम्रम्, अशोकम्, वास्तुकम्, केम्बुकम्, वर्तुलकम्, पुष्पशाकम्, भेण्डम्

नाम ..............................................................................



**चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।**

| **शाका** | **पुष्पम्** | **फलम्** |
| --- | --- | --- |
| अलाबुः | मल्लिका | द्राक्षाफलम् |

5.**सुचनानुसारं जैवकृषिरीतिम् अधिकृत्य टिप्पणिं लिखत।**

जैवकृषिरीतिः मनुष्याणाम् आरोग्याय ................. कृषिक्षेत्रे बीजानां वपनं ............ भूमेः उर्वरता आर्द्रता च। कीटनाशाय, पुष्पसस्यानि रासोर्वरकाणां, स्थाने जैवोर्वरकाणि, ...............

**चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।**

6.**उदाहरणानुसारं जैवकृषिरीतिम् अधिकृत्य लघुलेखां लिखतु।**

**योगविद्यां स्वीकुरु, आरोग्यम् आर्जय।**

भोः मान्याः,

इदानीन्तनकाले योगविद्यायाः पालनेन आरोग्यं लभते। जूण् मासस्य एकविंशति दिनाङ्के समीपस्थे विद्यालयाङ्कणे योगविद्यायाः प्राधान्यमधिकृत्य संगोष्ठी प्रचलिष्यति। अस्माकं प्रमुखयोगविद्याचार्याः भागं भजन्ते। अस्मिन् सुवर्णावसरे सर्वेषां जनानां सान्निध्यं सादरं प्रार्थये।

सविनयम्

तृश्शूर्                                        कार्यवाहकः

नाम ..........................................................................



**चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।**

7.**विभक्तिपरिवर्तनम्।**

**प्रथमाविभक्तेः पदानि तृतीयाविभक्तौ परिवर्त्य लेखनीयानि।**

| **प्रथमा** | **तृतीया** |
|---|---|
| बालः | बालेन |
| रामः | रामेण |
| छात्रः | ——— |
| मृगः | ——— |
| लता | लतया |
| गीता | ——— |
| वनिता | ——— |
| वनं | वनेन |
| जलं | ——— |
| कविः | कविना |
| रविः | ——— |
| जननी | जनन्या |
| शिवानी | ——— |

## चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।

| | |
|---|---|
| अहं | मया |
| त्वं | त्वया |
| सः | तेन |
| सा | तया |
| छात्राः | छात्रैः |
| मृगाः | ——— |
| बालाः | ——— |

8.**प्रयोगपरिचयः।**

**कर्तरिप्रयोगः**

कर्ता प्रथमा विभक्तिः
कर्म द्वितीया विभक्तिः
क्रिया कर्तारमनुसृत्यैव।

अध्यापकः पाठं पठति।
कर्ता - अध्यापकः
कर्म - पाठं
क्रिया - पठति।

**कर्मणि प्रयोगः**

कर्ता तृतीया विभक्तिः
कर्म प्रथमा विभक्तिः
क्रिया कर्ममनुसृत्य आत्मनेपदम्।

अध्यापकेन पाठः पठ्यते।
कर्ता - अध्यापकेन
कर्म - पाठः
क्रिया - पठ्यते।

नाम ..........................................................................



## चतुर्थः पाठः - कृषिः सर्वार्थसाधिका।

| | **कर्तरिप्रयोगः** | **कर्मणि प्रयोगः** |
|---|---|---|
| १. | बालः देवं नमति। | बालेन देवः नम्यते। |
| २. | सीता रमां पश्यति। | ____________। |
| ३. | दिनेशः जनकं प्रणमति। | ____________। |
| ४. | छात्राः प्रार्थनां कुर्वन्ति। | ____________। |
| ५. | ____________। | अम्बया ओदनः पच्यते। |
| ६. | महिलाः जलम् आनयन्ति। | ____________। |
| ७. | अहं फलानि खादामि। | ____________। |
| ८. | अहं त्वां वन्दे। | ____________। |
| ९. | गोपालः गां रक्षति। | ____________। |
| १०. | कृषकाः बीजानि स्वीकुर्वन्ति। | ____________। |

नाम ....................................................................................

**9.जैवकृषिरीतिम् अधिकृत्य कृषिकार्यालयाधिकारिणा सह संजायमानं संभाषणं पूरयत।**

छात्रः - नमस्ते श्रीमन्।

अधिकारी - नमस्ते।

छात्रः - जैवकृषिस्थलं ———।

अधिकारी - जैवकृषिस्थले यथेष्टं जलं सूर्यप्रकाशं च आवश्यकम्।

छात्रः - कानि कानि ————— ?

अधिकारी - भेण्डः, कारवेलः, मरीचम् इत्यादीनि रोपणीयानि।

छात्रः - ————— कुतः ————— ?

अधिकारी - बीजानि कृषिभवनात् उपलभ्यन्ते।

छात्रः - ———— उर्वरकाणि ————— ?

अधिकारी - जैवोर्वरकाणि शाकानां परिपोषणाय उपयुज्यन्ते।

छात्रः - ——————— ?

अधिकारी - कीटानि अपाकर्तुम् अस्माभिः पुष्पसस्यानि पालनीयानि।

छात्रः - धन्यवादः।

अधिकारी - स्वागतम्।

नाम ..........................................................................



**पञ्चमः पाठः - गीतासुधामाधुरि ।**

**1.उदाहरणानुसारं विश्लेषयत ।**

१. ह्याशु = हि + आशु। (इकारस्य यकारादेशः)

२. अप्याचारः = —— + ————।

३. कर्मण्येव = —— + ————।

१. हानिरस्य = हानिः + अस्य। (स्वरे परे विसर्गस्य रेफः)

२. कविरिति = —— + ————।

३. बुद्धिर्युक्तस्य = —— + ————।

४. शान्तिरशान्तस्य = —— + ————।

**2.उदाहरणानुसारं संश्लेषयत ।**

१. च + अयुक्तस्य = चायुक्तस्य। (अ+अ=आ)

२. च + अभावयत = ————।

३. कर्म + अपि = ————।

**3.श्लोकेषु विद्यमानानि क्रियापदानि चित्वा लिखत ।**

१. ———— ————

२. ———— ————

३. ———— ————

४. ———— ————

4.**गद्यक्रमं पूरयत ।**

१. अस्य प्रसादे ———— हानि उपजायते। हि प्रसन्नचेतसः ————

आशु ————।

२. अयुक्तस्य ———— नास्ति। ———— भावना च न। अभावयतः

———— च न। ———— कुतः सुखम् ?

३. हि चरताम् ———— यन्मनः अनुविधीयते तदस्य ———— ————

अंभसि नावमिव ————।

४. यः पुमान् ———— ———— विहाय निस्पृहः ———— ————

चरति सः शान्तिम् अधिगच्छति।

5.**अधोदत्तान् श्लोकान् पठित्वा विषयानुसारं क्रमीकरोतु।**

१. विद्या विनयसम्पन्ने
ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च
पण्डिताः समदर्शिनः।।

२. जातस्य हि ध्रुवो मृत्युः
ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे
न त्वं शोचितुमर्हसि।।

नाम ..............................................................................

## पञ्चमः पाठः - गीतासुधामाधुरि ।

३. उद्धरेदात्मनात्मानं
नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुः
आत्मैव रिपुरात्मनः ।।

४. कर्मण्येवाधिकारस्ते
मा फलेषु कदाचन ।
मा कर्म फलहेतुर्भूः
मा ते सङ्गोऽस्त्वकर्मणि ।।

५. परित्राणाय साधूनां
विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय
संभवामि युगे युगे ।।

६. क्रोधात् भवति सम्मोहः
सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशो
बुद्धिनाशात् प्रणश्यति ।।

७. योगस्थः कुरु कर्माणि
सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा
समत्वं योग उच्यते ।।

नाम ........................................................................



## पञ्चमः पाठः - गीतासुधामाधुरि ।

१. क्रोधेन सर्वनाशः।

२. धर्मसंस्थापनम्।

३. समत्वं योग उच्यते।

४. आत्मना आत्मानम् उद्धरेत्।

५. कर्मणि एव अधिकारः।

नाम ..........................................................................

६. मृतौ शोचितुं नार्हति।

७. पण्डिताः समदर्शिनः।

**6.दत्तानां संस्थानां ध्येयवाक्यानि अन्तर्जालसाहाय्येन सञ्चिनोतु।**

| संस्था | | ध्येयवाक्यम् |
|---|---|---|
| १. जवहर् लाल् नेहरू सर्वकलाशाला (JNU) | - | योगः कर्मसु कौशलम्। |
| २. जीवन भीमा निगमः (LIC) | - | |
| ३. भारतीय वायुसेना (Air Force) | - | |
| ४. मैसूर् सर्वकलाशाला | - | |

नाम ..............................................................................



## षष्ठः पाठः - त्वमेव जननी भव।

1.**मातृकानुसारं विश्लेषयत।**

| | | | | | |
|---|---|---|---|---|---|
| १. | जीवितास्मि | = | जीविता | + | अस्मि। |
| | | | | | (अ/आ+अ/आ=आ) |
| | कास्ति | = | ——— | + | ———। |
| | अद्यास्मि | = | ——— | + | ———। |
| | नास्ति | = | ——— | + | ———। |
| | क्वासि | = | ——— | + | ———। |
| | कुत्रासि | = | ——— | + | ———। |
| | नाहम् | = | ——— | + | ———। |
| | तवासनम् | = | ——— | + | ———। |
| २. | किन्त्विदानीम् | = | किन्तु | + | इदानीम्। (उ+स्वरः=व्) |
| | खल्वहम् | = | ——— | + | ———। |
| | जान्वपि | = | ——— | + | ———। |

नाम ..............................................................................



**षष्ठः पाठः - त्वमेव जननी भव।**

2.**उदाहरणानुसारं विग्रहवाक्यं लिखत।**

१. नेत्रोत्सवः - नेत्रयोः उत्सवः।

२. गदाघातः - ____________________।

३. रामपाणिः - ____________________।

४. अध्यापकग्रन्थः - ____________________।

५. अन्तर्गतास्राः - अन्तर्गताश्च ते अस्राः।

६. मनोहरवृक्षाः - ____________________।

७. सुन्दरपुरुषाः - ____________________।

3.**सम्बोधनरूपाणि व्याक्षेपकरूपाणि च विविच्य पट्टिकां कुरुत।**

भोः, पुत्र, पुत्रक, जात, दुर्योधन, सुयोधन, हा, पौत्र
तात, महाराज, आर्याः, अये, ज्येष्ठ

| सम्बोधनरूपाणि | व्याक्षेपकरूपाणि |
| --- | --- |
| | |

नाम ..............................................................................

**षष्ठः पाठः - त्वमेव जननी भव।**

4.**कोष्ठकात् प्रश्नवाचकशब्दान् स्वीकृत्य रिक्तांशान् पूरयत।**

**(क्व, कथं, कः, कुत्र, केन, कस्य)**

१. ———— दुर्योधनम् अपातयत्?

२. ———— पुत्रः दुर्जयः?

३. भीमसेनः ———— दुर्योधनम् अपातयत्?

४. धृतराष्ट्रः ———— आनीतः?

५. दुर्योधनः ऊरुं विदार्य ———— अपतत्?

६. ऊरुभङ्गं ———— विरचितम्?

5.**उपरि लिखितप्रश्नानाम् उत्तराणि लिखत।**

१.

२.

३.

४.

५.

६.

नाम .....................................................................



**षष्ठः पाठः - त्वमेव जननी भव।**

6.**अधोदत्तान् कथास्तम्भान् क्रमीकृत्य मातृभाषायां विवर्तयत।**

१. गान्धारी स्वपुत्रं समाश्वासयति।
२. अन्यस्मिन् जन्मनि त्वमेव जननी भव इति प्रार्थयति।
३. अङ्के उपवेष्टुम् उद्युक्तं पुत्रं निवारयति।
४. ऊरुभङ्गेन पतितं दुर्योधनं मिलति।
५. मरणासन्नः इति तान् सूचयति।
६. गान्धारी धृतराष्टौ दुर्जयेन साकं कुरुक्षेत्रभूमौ आगच्छतः।

**क्रमीकृत्य लिखत।**

१.

२.

३.

४.

५.

६.

नाम .................................................................

**षष्ठः पाठः - त्वमेव जननी भव।**

**मातृभाषया लिखत।**

7.**कोष्ठके प्रदत्तानि पदानि उपयुज्य रिक्तांशान् पूरयत।**

**(अवदत्, आसीत्, भवतु, अभवत्, आसन्)**

महाभारतानुसारं गान्धार्याः शतं पुत्राः ______________। तेषु दुर्योधनस्य मातृस्नेहः अन्यतमः ______________। मरणसमये दुर्योधनः अन्यस्मिन् जन्मनि अपि गान्धारी एव माता ______________ इति ______________।

नाम ..................................................................



**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।**

1.**उदाहरणानुसारं सन्धिच्छेदं कुरुत ।**

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | चेदिदम् | = | चेत् | + | इदम् । (तकारस्य दकारः) |
| | चेदत्र | = | | + | |
| | शश्वदुपप्लवेभ्यः | = | | + | |
| २. | गौरेका | = | गौः | + | एका । (स्वरे परे विसर्गस्य रेफः) |
| | तैरपि | = | | + | |
| | बालैरिति | = | | + | |
| ३. | तद्रक्ष | = | तत् | + | रक्ष । |
| | तद्रवः | = | | + | |
| | त्वद्रक्षति | = | | + | |

नाम ..............................................................................



**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।**

2.**उदाहरणानुसारं विग्रहवाक्यं लिखत।**

| | | | | |
|---|---|---|---|---|
| १. | भूतनाथः | भूतानां | नाथः | भूतनाथः |
| | मृगनाथः | ________ | ________ | ________ |
| | प्रजानाथः | ________ | ________ | ________ |
| | खगसमूहः | ________ | ________ | ________ |
| | विचारमूढः | विचारे | मूढः | विचारमूढः |
| | आचारतत्परः | ________ | ________ | ________ |
| | शिवभक्तः | ________ | ________ | ________ |

3.**प्रदत्तानां पदानां समानार्थकपदानि मञ्जूषातः चित्वा लिखत।**

पर्वतः, गुहा, किरणः, शिवः, पुनः, त्यक्तुं, शरीरं, रम्यं, उपद्रवेभ्यः, समृद्धम्
भूतलं, श्रुत्वा, नितरां, उन्नतः, प्रसिद्धः, निन्दा, पराधीनः, जानाति
सख्यम्, आवयोः, मम, लोकेषु, नृपः

नाम ..........................................................................

संस्कृतम्
STD - VIII

**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।**

| | | | | | |
|---|---|---|---|---|---|
| १. | भुवनेषु | = | १३. | नौ | = |
| २. | रूढः | = | १४. | मे | = |
| ३. | निशम्य | = | १५. | उदग्रः | = |
| ४. | सुतरां | = | १६. | उपक्रोशः | = |
| ५. | गह्वरं | = | १७. | गिरिः | = |
| ६. | भूयः | = | १८. | मयूखः | = |
| ७. | अर्थपतिः | = | १९. | भूतेश्वरः | = |
| ८. | वपुः | = | २०. | कान्तम् | = |
| ९. | महीतलं | = | २१. | उपप्लवेभ्यः | = |
| १०. | अवैति | = | २२. | ऋद्धम् | = |
| ११. | परवान् | = | २३. | सम्बन्धम् | = |
| १२. | हातुं | = | | | |

नाम ..........................................................................



**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम्।**

4.**क्त्वान्त - ल्यबन्त - तुमुन्नन्तपदानां पट्टिकां कुरुत।**

विहस्य, हातुं, निशम्य, स्थातुं, विनाश्य, हसित्वा, त्यक्तुं
श्रुत्वा, नाशयित्वा, कर्तुं, विहन्तुं, नाशयितुं

| क्त्वान्तपदानि | ल्यबन्तपदानि | तुमुन्नन्तपदानि |
| --- | --- | --- |
| | | |

5.**प्रदत्तानि वाक्यानि संस्कृतभाषायां विवर्तयत।**

1. ശിവഭൃത്യനായ സിംഹം ചിരിച്ചിട്ട് ദിലീപനോട് പറഞ്ഞു.

2. ലോകത്തിന്റെ നാഥനായ അങ്ങ് ചിന്താരഹിതനായി കാണുന്നു.

3. അങ്ങേയ്ക്ക് ജീവികളോട് സ്നേഹമുണ്ട്.

नाम ..............................................................................



## सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।

4. പശുവിന് വേണ്ടി സ്വജീവനെ ഉപേക്ഷിക്കുവാൻ അങ്ങ് ആഗ്രഹിക്കുന്നു.

5. അങ്ങ് പ്രാണനെ ധരിച്ച് ജീവജാലങ്ങളെ രക്ഷിക്കൂ.

6. രാജ്യം ഭൂലോകത്തിലെ സ്വർഗ്ഗമാണ്.

7. രാജ്യത്തിന് വേണ്ടി ശരീരം രക്ഷിക്കൂ.

8. സിംഹത്തിന്റെ വാക്ക് കേട്ടിട്ട് ദിലീപൻ പറഞ്ഞു.

9. ക്ഷത്രിയൻ എന്നാൽ നാശത്തിൽ നിന്ന് രക്ഷിക്കുന്നവൻ എന്നാണ്.

10. വിപരീതകർമ്മം ദോഷമാണ്.

11. പരസ്പര സംഭാഷണം കൊണ്ട് സൗഹൃദം ഉണ്ടാകുന്നു.

12. ബന്ധുവായ എന്റെ സ്നേഹം നീ ത്യജിക്കരുത്.

6.**सम्भाषणांशान् पूरयत।**

राजा - भवान् ——— ?

सिंहः - अहं शिवस्य ————।

राजा - धेनुं त्यज, मम शरीरं स्वीकुरु।

सिंहः - भवतः नवं ——— कान्तं ———— किमर्थम्
आत्मत्यागाय इच्छति ?

राजा - क्षत्रशब्दस्य ———— इत्यर्थः।
विरुद्धकर्मणा निन्दनीयैः ——— किं प्रयोजनम् ?

सिंहः - अतः किम् ?

राजा - पालनीयं वस्तु ————— नियोक्तुः पुरतः ——— न
शक्यम्। परस्परसम्भाषणेन ———— भवति।
आवयोः ————— त्यक्तुं न योग्यः।

नाम ..........................................................................

संस्कृतम्
STD - VIII

**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।**

7.**मातृभाषायां विवर्तयत ।**

**मानव जीवने मूल्यानां प्रसक्तिः ।**

सिंहदिलीपयोः सम्भाषणे राजा दिलीपः विचारमूढः इति सिंहः वदति। अल्पस्य धेनोः निमित्तं बहूनि त्यक्तुमुत्सुकस्य नृपस्य विचारमूढतां परिहसति। दिलीपः प्रत्यवदत्, क्षतात् त्रायते इति क्षत्रिय शब्दस्य अर्थः। तस्य विरुद्धव्यापारवतः राज्ञः राजभावेन, एतादृशैः निन्दनीयैः प्राणैः किं वा प्रयोजनम्? स्वामिनः अधीनः भवानपि कर्तव्यमहत्वं जानाति। भवतः पुरोवर्तिनः देवदारोः रक्षणे अत्यन्तं प्रयासः अस्ति। पालनीयं वस्तु नाशयित्वा स्वयमक्षतः सन् नियोक्तुः पुरतः स्थातुं न केनापि शक्यते।

8.**प्रदत्ते गद्यक्रमे रिक्तांशान् पूरयत ।**

१. अथ भूतेश्वरपार्श्ववर्ती सः —————— अन्धकारं दंष्ट्रामयूखैः ————
कुर्वन् किञ्चित् —————— अर्थपतिं भूयः —————।

२. एकातपत्रं —————— प्रभुत्वं नवं वयः ———— कान्तं —————
बहु अल्पस्य हेतोः ———— इच्छन् त्वं —————— प्रतिभासि।

नाम .............................................................................



**सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम्।**

३. तव भूतानुकम्पा चेत् ———— इयम् एका स्वस्तिमती प्राणनाथ !

जीवन् पुनः ———— प्रजाः उपप्लवेभ्यः ———— पासि।

४. तत् ———— भोक्तारम् ———— आत्मदेहं रक्ष, हि विद्वांसः

———— राज्यं महीतलस्पर्शनमात्रभिन्नम् ———— आहुः।

५. देवानुचरस्य ———— निशम्य तदध्यासितकातराक्ष्या ————

निरीक्षमाणः सुतरां ———— (सन्) मनुष्यदेवः पुनरपि ————।

६. उदग्रः ———— शब्दः क्षतात् ———— इति भुवनेषु रूढः किल

तद्विपरीतवृत्तेः ———— वा उपक्रोशमलीमसैः ———— किम्?

७. परवान् ———— इदम् अवैति हि तव ———— महान् यत्नः

———— विनाश्य स्वयम् ———— नियोक्तुः अग्रे ————

———— हि।

८. सम्बन्धम् ———— आहुः सः वनान्ते ———— नौ वृत्तः तत्

————त्वं सम्बन्धिनः मे ———— विहन्तुं न अर्हति।

नाम ..............................................................................

## सप्तमः पाठः - सम्बन्धमाभाषणपूर्वकम् ।

9.**खण्डिकां पठित्वा प्रदत्तानां प्रश्नानाम् उत्तरं लिखत।**

दिलीपः सुर्यवंशस्य प्रबलः राजा आसीत्। अनपत्यतादुःखेन विषण्णः दिलीपः पत्न्या सुदक्षिणया साकं कुलगुरुं वसिष्ठं द्रष्टुम् अगमत्। वसिष्ठवचनेन पुत्रलाभार्थं सर्वाभीष्टप्रदायिनीं कामधेनुसुतां नन्दिनीम् असेवत। नन्दिनी हिमालयस्य कमपि गह्वरं प्राविशत्। सपदि केनचित् सिंहेन सा आक्रान्ता।

१. दिलीपः कः?

२. दिलीपः केन दुःखितः?

३. सः पुत्रलाभार्थं काम् असेवत?

४. नन्दिनी कुत्र प्राविशत्?

५. नन्दिनी केन आक्रान्ता?

नाम ........................................................................



**अष्टमः पाठः - लौकिकन्यायाः।**

1.**न्यायान् सन्दर्भेण सह योजयत।**

| | |
|---|---|
| १. अल्पज्ञः सर्वज्ञभावं प्रकटयति। | स्थालीपुलाकन्यायः। |
| २. अस्थाने कृतं कर्म फलं न जनयति। | अन्धपङ्गुन्यायः। |
| ३. परस्पराश्रयत्वेन लक्ष्यप्राप्तिः। | कूपमण्डूकन्यायः। |
| ४. द्राक्षफलगुच्छात् एकं खादित्वा सर्वं पक्वमिति निश्चिनोति। | अरण्यरोदनन्यायः। |
| ५. व्यर्थकार्याय समययापनम्। | अन्धदर्पणन्यायः। |
| ६. दुष्टेन सह सज्जनस्य सङ्गः भवति चेत्, सज्जनस्य एव हानिः, दुष्टस्य न। | काकदन्तगवेषणन्यायः। |
| ७. दुर्गुणवतां शतपुत्राणाम् अपेक्षया सुगुणः एकः एव पुत्रः वरम्। | दण्डापूपन्यायः। |
| ८. उपयोगः नास्ति चेत् दानस्य पुण्यमपि नास्ति। | कदलीकण्टकन्यायः। |
| ९. असमर्थः गोपालः अपि विजयं प्राप्तवान्, पुनः समर्थस्य रमेशस्य कार्यम्। | एकपुत्रन्यायः। |

नाम ..............................................................................

**अष्टमः पाठः - लौकिकन्यायाः।**

2.**मातृकानुसारं विश्लेषयत।**

| | | | | | |
|---|---|---|---|---|---|
| १. | मण्डूकोऽवसत् | = | मण्डूकः | + | अवसत्। |
| | सोऽवदत् | = | ______ | + | ______। |
| | रामोऽपि | = | ______ | + | ______। |
| २. | द्रष्टुञ्च | = | द्रष्टुं | + | च। |
| | वक्तुञ्च | = | ______ | + | ______। |
| | नेतुञ्च | = | ______ | + | ______। |
| ३. | तावेकाम् | = | तौ | + | एकाम्। |
| | तावनादृत्य | = | ______ | + | ______। |
| | बालावपि | = | ______ | + | ______। |
| ४. | तच्छ्रुत्वा | = | तत् | + | श्रुत्वा। |
| | एतच्छ्रुत्वा | = | ______ | + | ______। |

नाम ..............................................................................

**नवमः पाठः - सर्गवैचित्र्यम्।**

1.**प्रदत्तानां पदानाम् उत्तरं लिखत।**

१. अलाबुलता कुत्र आसीत्?

२. अलाबुलतायाः दुःखस्य कारणं किम्?

३. अलाबुलतायाः प्रार्थना का?

४. अलाबुलता कथं भूमौ अपतत्?

५. जीविनां सृष्टेः फलं किम्?

2.**अधो रेखाङ्कितानि पदानि उत्तरत्वेन लब्धुमर्हान् प्रश्नान् लिखत।**

१. प्रभाते अलाबुलता नारिकेलवृक्ष इव उन्नतिं प्राप।

२. सर्वाणि फलानि विदीर्णानि।

३. सूर्यप्रकाशं शुद्धवायुं च अनुभूय तोषमवाप।

नाम ..........................................................................

४.    अलाबुलता <u>प्रकृतिमातरं</u> प्रार्थयत।

५.    हरितानि पर्णानि विस्तार्य <u>नारिकेलवृक्षाः</u> आसन्।

**उदाहरणानुसारं पट्टिकां पूरयत।**

| **वर्तमानकालः (लट्)** | - | **भूतकालः (लङ्)** |
|---|---|---|
| अस्ति | - | आसीत् |
| चिन्तयति | - | अचिन्तयत् |
| *वि + चिन्तयति | - | वि + अचिन्तयत् = व्यचिन्तयत् |
| तिष्ठति | - | ________ |
| पतति | - | ________ |
| भवति | - | ________ |
| ________ | - | अवदत् |
| ________ | - | अपश्यत् |
| लिखति | - | ________ |

*उपसर्गयुक्तस्य धातोः लङ्, लुङ्, लृङ् लकारेषु अ (अडागमः) उपसर्गात् परमेव।

नाम ...........................................................................

**नवमः पाठः - सर्गवैचित्र्यम्।**

4.**क्त्वान्त ल्यबन्त तुमुन्नन्त पदानि पट्टिकां कुरुत।**

विस्तार्य, दृष्ट्वा, अनुभूय, वोढुं, श्रुत्वा, गन्तुं, प्रार्थयित्वा, समेत्य, श्रोतुं

| **क्त्वान्तपदानि** | **ल्यबन्तपदानि** | **तुमुन्नन्तपदानि** |
|---|---|---|
| दृष्ट्वा | विस्तार्य | गन्तुं |
| गत्वा | *आगत्य | |

5.**अधोदत्तानि वाक्यानि कस्याः इति विवेचयत।**

१. मातः ! मामपि नारिकेलवृक्ष इव उन्नतिं प्रापयतु। -
(प्रकृतिमातुः, अलाबुलतायाः, नारिकेलवृक्षस्य)

२. मदीयसृष्टौ जीविनां गुणाः स्वभावजाः भिन्नाश्च कल्पिताः। -
(वृक्षस्य, प्रकृतिमातुः, लतायाः)

*गम् आ + गम् - उपसर्गपूर्वस्य धातोः क्त्वा इत्यस्य स्थाने ल्यप्।

३. मया यत् प्रार्थितं तत् अनुचितमेव कृपया मम अपराधः क्षम्यताम्।-
(नारिकेलस्य, पूगवृक्षस्य, अलाबुलतायाः)

6.**समानार्थकपदानि यथोचितं योजयत।**

| | | | | |
|---|---|---|---|---|
| भवनम् | - | पादपः | - | ————— । |
| विदीर्णम् | - | दुःखम् | - | ————— । |
| वृक्षः | - | भग्नम् | - | ————— । |
| तोषः | - | गृहम् | - | ————— । |
| शोकः | - | सन्तोषः | - | ————— । |

7.**उदाहरणानुसारं संश्लेषयत।**

| | | | | | |
|---|---|---|---|---|---|
| १. | अपि | + | आसन् | = | अप्यासन्। (इ + अ = य) |
| | सीमनि | + | अपि | = | ————— । |
| | आत्मनि | + | अगच्छत् | = | ————— । |
| २. | रामम् | + | अपि | = | राममपि। |
| | तोषम् | + | अवाप | = | ————— । |
| | विदीर्णम् | + | अभवत् | = | ————— । |

## नवमः पाठः - अनुबन्धः ।

### ४.परिवर्तनं करोतु ।

**മൈത്രി**

ഒരു വനത്തിൽ ഒരു ഉറുമ്പ് ജീവിച്ചിരുന്നു. പ്രാവ് അവന്റെ കൂട്ടുകാരനായിരുന്നു. ഒരിക്കൽ ശക്തമായ മഴയിൽ ഉറുമ്പ് വെള്ളത്തിൽ വീണു. ഇതു കണ്ടിട്ട് പ്രാവ് ഒരു ഇല ഉപയോഗിച്ച് ഉറുമ്പിനെ രക്ഷിച്ചു. ഉറുമ്പ് പ്രാവിന് നന്ദി പറഞ്ഞു. കാലം കടന്നുപോയി. ഒരിക്കൽ ഒരു നിഷാദൻ കാട്ടിലെത്തി. അവൻ പ്രാവിനെ കൊല്ലാൻ ശ്രമിച്ചു. അനന്തരം ബാണം അയച്ചു. ഇത് കണ്ടിട്ട് പ്രാവിന്റെ രക്ഷയ്ക്കായി ഉറുമ്പ് നിഷാദന്റെ കാലിൽ കടിച്ചു. നിഷാദന്റെ അമ്പ് ലക്ഷ്യം പ്രാപിച്ചില്ല. പ്രാവ് രക്ഷപ്പെട്ടു. ഉറുമ്പും പ്രാവും വീണ്ടും സസുഖം ജീവിച്ചു.

| | | |
|---|---|---|
| ജീവിച്ചിരുന്നു | - | जीवति स्म, अजीवत् |
| അയച്ചു | - | प्रेषयति स्म, प्रैक्षत् |
| കടിച്ചു | - | दशति स्म, अदशत् |

नाम ..........................................................................

संस्कृतम्
STD - VIII

**नवमः पाठः - सर्गवैचित्र्यम् ।**

**ദയാ**

സിദ്ധാർത്ഥൻ ശുദ്ധോദനന്റെ പുത്രനാണ്. ഒരിക്കൽ സിദ്ധാർത്ഥൻ ഉദ്യാനത്തിൽ സഞ്ചരിക്കുകയായിരുന്നു. അവൻ മുറിവേറ്റ ഒരു ഹംസത്തെ കണ്ടു. അവൻ ഹംസത്തിനെ എടുത്ത് പരിചരിച്ചു. അപ്പോൾ ദേവദത്തൻ അവിടെ വന്നു. അവൻ പറഞ്ഞു. ഹംസത്തിന്റെ ഉടമസ്ഥൻ ഞാനാണ്. അതിനെ എനിക്ക് തന്നാലും. അവർ പരസ്പരം തർക്കിച്ചു. അനന്തരം അവർ ന്യായാധിപന്റെ സമീപത്ത് എത്തി. അദ്ദേഹം പറഞ്ഞു. ദേവദത്തൻ പ്രാണനാശകൻ ആകുന്നു. സിദ്ധാർത്ഥൻ പ്രാണരക്ഷകൻ ആകുന്നു. അതിനാൽ ഹംസത്തിന്റെ അവകാശി സിദ്ധാർത്ഥൻ തന്നെ.

| | | |
|---|---|---|
| പരിചരിച്ചു | - | पर्यचरत् (परिचरति स्म) |
| തർക്കിച്ചു | - | अतर्कयत् (तर्कयति स्म) |

| ഉപസർഗം ചേർന്ന ലട് രൂപങ്ങൾ | | ഉപസർഗം ചേർന്ന ലങ് രൂപങ്ങൾ |
|---|---|---|
| उप + गच्छति = उपगच्छति | - | उप + अगच्छत् = उपागच्छत् |
| सम् + गच्छति = सङ्गच्छति | - | सम् + अगच्छत् = समगच्छत् |
| उप + दिशति = उपदिशति | - | उप + अदिशत् = उपादिशत् |
| निर् + दिशति = निर्दिशति | - | निर् + अदिशत् = निरदिशत् |
| उप + करोति = उपकरोति | - | उप + अकरोत् = उपाकरोत् |
| नि + वेदयति = निवेदयति | - | नि + अवेदयत् = न्यवेदयत् |

नाम ..............................................................................



## नवमः पाठः - सर्गवैचित्र्यम्।

| ഉപസർഗം ചേർന്ന ലട് രൂപങ്ങൾ | | ഉപസർഗം ചേർന്ന ലങ് രൂപങ്ങൾ |
|---|---|---|
| सम् + भवति = सम्भवति | - | सम् + अभवत् = समभवत् |
| अनु + भवति = अनुभवति | - | अनु + अभवत् = अन्वभवत् |
| प्र + भवति = प्रभवति | - | प्र + अभवत् = प्राभवत् |
| वि + कसति = विकसति | - | वि + अकसत् = व्यकसत् |
| वि + लसति = विलसति | - | वि + अलसत् = व्यलसत् |
| परि + हसति = परिहसति | - | परि + अहसत् = पर्यहसत् |
| परि + गणयति = परिगणयति | - | परि + अगणयत् = पर्यगणयत् |
| सम् + हरति = संहरति | - | सम् + अहरत् = समहरत् |
| सम् + आ + हरति = समाहरति | - | सम् + आ + अहरत् = समाहरत् |
| वि + जयते = विजयते | - | वि + अजयत = व्यजयत |
| अव + गच्छति = अवगच्छति | - | अव + अगच्छत् = अवागच्छत् |
| वि + लोकयति = विलोकयति | - | वि + अलोकयत् = व्यलोकयत् |
| नि + क्षिपति = निक्षिपति | - | नि + अक्षिपत् = न्यक्षिपत् |
| अनु + गच्छति = अनुगच्छति | - | अनु + अगच्छत् = अन्वगच्छत् |
| अन्तर् + भवति = अन्तर्भवति | - | अन्तर् + अभवत् = अन्तरभवत् |
| बहिः + गच्छति = बहिर्गच्छति | - | बहिः + अगच्छत् = बहिरगच्छत् |
| परि + पालयति = परिपालयति | - | परि + अपालयत् = पर्यपालयत् |
| परि + नयति = परिणयति | - | परि + अनयत् = पर्यणयत् |
| प्र + नमति = प्रणमति | - | प्र + अनमत् = प्राणमत् |
| वि + हरति = विहरति | - | वि + अहरत् = व्यहरत् |
| सम् + पश्यति = सम्पश्यति | - | सम् + अपश्यत् = समपश्यत् |
| अधि + वसति = अधिवसति | - | अधि + अवसत् = अध्यवसत् |
| वि + चिन्तयति = विचिन्तयति | - | वि + अचिन्तयत् = व्यचिन्तयत् |
| अभि + वन्दते = अभिवन्दते | - | अभि + अवन्दत = अभ्यवन्दत |

नाम ..................................................................................



**नवमः पाठः - सर्गवैचित्र्यम् ।**

| ഉപസർഗം ചേർന്ന ലട് രൂപങ്ങൾ | | ഉപസർഗം ചേർന്ന ലങ് രൂപങ്ങൾ |
|---|---|---|
| प्र + विशति = प्रविशति | - | प्र + अविशत् = प्राविशत् |
| उप + विशति = उपविशति | - | उप + अविशत् = उपाविशत् |
| वि + नश्यति = विनश्यति | - | वि + अनश्यत् = व्यनश्यत् |
| प्रति + वदति = प्रतिवदति | - | प्रति + अवदत् = प्रत्यवदत् |
| सम् + अर्पयति = समर्पयति | - | सम् + आर्पयत् = समार्पयत् |

9.**सम्भाषणपूरणम् ।**

अलाबुलता - नमस्ते नारिकेल, मम ———— अवस्थां पश्यतु।

नारिकेलः - ———।तव दुःखकरी अवस्था ——— ?

अलाबुलता - सर्वे पादाघातेन मां ————।

नारिकेलः - अलं ————। भवती तिरस्कृता इव भूमावेव शेते।जनानां ———— तदेव कारणम्।

अलाबुलता - मया किं —————। अहमपि भवान् इव उन्नतशीर्षा भवितुम् इच्छामि।

नारिकेलः - प्रकृतिमातरं ————।

अलाबुलता - एवमेव ————— प्रार्थयामि।

> नमस्ते, प्रार्थयतु, का, पीडयति, विषादेन, करणीयम्
> कष्टतरा, पादाघातस्य, प्रकृतिमातरम्

नाम ..................................................................................



## दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।

### 1.उदाहरणानुसारं संश्लेषयत।

| | | | | | |
|---|---|---|---|---|---|
| १. | एव | + | उपशाम्यति | = | एवोपशाम्यति (अ+उ = ओ) |
| | अथ | + | उदयते | = | ———————————। |
| २. | अक्षयत्वात् | + | च | = | अक्षयत्वाच्च (त्+च = च्च) |
| | तत् | + | च | = | ————————————। |
| | अस्मत् | + | च | = | ————————————। |

### 2.समानार्थकपदानि यथोचितं योजयत।

| | | | |
|---|---|---|---|
| १. | करः | - | शत्रुभावः |
| २. | वह्निः | - | अमूल्यम् |
| ३. | शस्त्रम् | - | हस्तः |
| ४. | अनर्घ्यम् | - | आयुधम् |
| ५. | वैराणि | - | अग्निः |
| ६. | विपदि | - | दुःखम् |
| ७. | व्यसनम् | - | आपदि |

नाम ..............................................................................



## दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।

### 3. श्लोकान् विषयानुसारं पट्टिकां कुरुत।

१. रूपयौवनसम्पन्ना
विशालकुलसम्भवा।
विद्याहीना न शोभन्ते
निर्गन्धा इव किंशुकाः।।

२. सत्यमेवेश्वरो लोके
सत्ये धर्मः सदाश्रितः।
सत्यमूलानि सर्वाणि
सत्यान्नास्ति परं पदम्।।

३. सत्यं ब्रूयात् प्रियं ब्रूयात्
न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयात्
एष धर्म सनातनः।।

४. क्षमा बलमशक्तानां
शक्तानां भूषणं क्षमा।
क्षमा वशीकृतिर्लोके
क्षमया किं न सिद्ध्यति।।

५. सुन्दरोऽपि सुशीलोऽपि
कुलीनोऽपि महाधनः।
न शोभते विना विद्यां
विद्या सर्वस्य भूषणम्।।

६. अयं निजः परो वेति
गणना लघुचेतसाम्।
उदारचरितानां तु
वसुधैव कुटुम्बकम्।।

७. यथा चित्तं तथा वाचो
यथा वाचस्तथा क्रियाः।
चित्ते वाचि क्रियायां च
साधूनामेकरूपता।।

८. विदेशेषु धनं विद्या
व्यसनेषु धनं मतिः।
परलोके धनं धर्मः
शीलं सर्वत्र वै धनम्।।

नाम ..........................................................................



**दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।**

९. विद्वत्वं च नृपत्वं च
नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा
विद्वान् सर्वत्र पूज्यते।।

१०. विपदिधैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

११. अष्टादशपुराणेषु
व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय
पापाय परपीडनम्।।

१२. नास्ति लोभसमो व्याधिः
नास्ति क्रोधसमो रिपुः।
नास्ति दारिद्र्यवद् दुःखं
नास्ति ज्ञानात् परं सुखम्।।

१३. परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम्।।

**विद्या।**

------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------

**सत्यम्।**

------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------
------------------------------------------ ------------------------------------------

नाम ...........................................................................



## दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।

### सज्जनस्वभावः।

------------------------------------------ ----------------------------------------------

------------------------------------------- ----------------------------------------------

--------------------------------------------- -----------------------------------------------

--------------------------------------------- -----------------------------------------------

### क्षमा।

### परोपकारः।

------------------------------------------ ----------------------------------------------

------------------------------------------- ----------------------------------------------

--------------------------------------------- -----------------------------------------------

--------------------------------------------- -----------------------------------------------

4.**प्रदत्तेषु सुभाषितेषु विद्यमानानि सूक्तानि लिखत।**

१.

२.

३.

४

५.

नाम ...........................................................................



**दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।**

5.**पूरयत।**

१. दानेन ________ नाशं यान्ति।

२. परः दानेन ________ उपैति।

३. दानं ________ हन्ति।

४. अतृणे पतितः ________ स्वयमेव उपशाम्यति।

५. ________ अनुत्तमं द्रव्यम् आहुः।

६. सर्वं ________ प्रतिष्ठितम्।

७. सदसि ________ युधि ________।

6.**उत्तरं लिखत।**

१. दानं सर्वव्यसनानि हन्ति इति वदन्ति। कथम्?

२. कस्य अपायं कर्तुं दुर्जनः न शक्नोति?

३. विद्या एव सर्वदा अनुत्तमं द्रव्यम् आहुः। कुतः?

४. सर्वमपि कार्यं सत्ये अधिष्ठितं भवति। कथम्?

५. महात्मनां स्वभावः कीदृशः भवति?

## दशमः पाठः - प्रकृतिसिद्धमिदं हि महात्मनाम्।

7.**रिक्तांशान् पूरयित्वा गद्यक्रमं लिखत।**

१. ________ दानेन वशीभवन्ति। वैराण्यपि ________ नाशं यान्ति।

परोऽपि दानेन ________। दानं ________ हन्ति हि।

२. यस्य करे ________, ________ किं करिष्यति ?

________ पतितो वह्नि स्वयम् एव ________।

३. अहार्यत्वात् ________ अक्षयत्वात् च ________ विद्या एव सर्वदा

________ द्रव्यम् आहुः।

४. ________ परः सदाचारः। ________ सर्वस्य जीवितम्।

सत्यं ________ रूपम्।________ सर्वं प्रतिष्ठितम्।

५. विपदि ________ अभ्युदये ________ सदसि ________ युधि

________ यशसि ________ अथ श्रुतौ ________ च।

इदं महात्मनां प्रकृतिसिद्धं हि।

नाम ..........................................................................

**एकादशः पाठः - केरलकालिदासः।**

1.**मातृकानुसारं संश्लेषयत।**

| | | | | | |
|---|---|---|---|---|---|
| १. | इति | + | अपि | = | इत्यपि। |
| | आत्मनि | + | अपि | = | ____________। |
| | इति | + | अवदत् | = | ____________। |
| २. | मयूरम् | + | एकम् | = | मयूरमेकम्। |
| | रीतिम् | + | अवलम्ब्य | = | ____________। |
| | पोषणम् | + | अकरोत् | = | ____________। |

2.**प्रदत्तानां पदानां समानार्थकपदानि कोष्ठकात् चित्वा लिखत।**

| पण्डितः, आसीत्, प्रयत्नं कृतवान्, बहिष्कृतः, कारागृहम्, आखेटः, यशः शरीरः |
|---|

१. मृगया - ____________।

२. कारागारः - ____________।

३. निष्णातः - ____________।

४. दिवंगतः - ____________।

नाम ..........................................................................

**एकादशः पाठः - केरलकालिदासः।**

५. अभवत् - ______________।

६. प्रायतत - ______________।

७. निष्कासितः - ______________।

3.**उदाहरणानुसारं संख्याः लिखतु।**

| | | |
|---|---|---|
| 1 | १ | एकम्। |
| 21 | २१ | एकविंशतिः। |
| 321 | ३२१ | एकविंशत्यधिकत्रिशतम्। |
| 2321 | २३२१ | एकविंशत्युत्तरत्रिशताधिकद्विसहस्रम्। |
| 1948 | १९४८ | अष्टचत्वारिंशदुत्तरनवशताधिकसहस्रम्। |
| 1846 | | |
| 2002 | | |
| 2008 | | |
| 2014 | | |
| 1926 | | |

नाम ..................................................................



**एकादशः पाठः - केरलकालिदासः।**

4.**प्रदत्तं जीवनचरितं पठित्वा जीवनरेखां लिखतु।**

भारतदेशस्य प्रथमः प्रधानमन्त्री आसीत् जवहर्लाल् नेहरु। अयं महात्मा १८८२ नवम्बर् मासस्य १४ दिने अहम्मदाबाद् नगरे जन्म लेभे। मोत्तिलाल् नेहरु स्वरूपाराणी च अस्य पितरौ। सः आङ्गलदेशं गत्वा शिक्षामाप्तवान्। सः स्वदेशस्य स्वातन्त्र्यम् अभिलषन् कान्ग्रस् संस्थायाः नेतृत्वमवहत्। १९६४ तमे मेई मासस्य १७ तमे दिने दिवंगतः।

नाम - ।

पितरौ - ।

जन्म - ।

विद्याभ्यासः - ।

मृत्युः - ।

नाम ..................................................................

**एकादशः पाठः - केरलकालिदासः।**

5.**जीवनरेखां निरीक्ष्य जीवनचरितं लिखत।**

**सूचनाः -**

| | | |
|---|---|---|
| नाम | - | श्रीनारायणगुरुदेवः। |
| जननम् | - | १८५४, चेम्पषन्तिग्रामे। |
| पितरौ | - | माटनाशान् कुट्टियम्मा च। |
| सन्देशः | - | एका जातिः, एको धर्मः, एको देवः मनुष्यस्य। |
| पाण्डित्यम् | - | संस्कृतम्, मलयालम्, तमिल्। |
| समाधिः | - | १९१८, शिवगिरौ। |

नाम ..............................................................................

**एकादशः पाठः - केरलकालिदासः।**

6.**पाठभागं पठित्वा रिक्तांशान् पूरयत।**

| | मलयालकाव्यानि | संस्कृतकाव्यानि | विवर्त्तितकृतयः |
|---|---|---|---|
| १. | | विशाखविजयम् | |
| २. | देवयोगम् | | |
| ३. | अमरुकशतकम् | | |
| ४. | अन्यापदेशशतकम् | | |

7.**उत्तरं लिखत**

१. केरलकालिदासः कः?

२. केरलवर्मवलियकोयितम्पुरान् कथं केरलकालिदासः इति प्रसिद्धिं प्राप्तवान्?

३. केरलकालिदासः कथं भाषायाः पोषणम् अकरोत्?

४. तेन विरचितं महाकाव्यं किम्?

५. केरलकालिदासस्य प्रसिद्धाः कृतयः काः?

६. केरलकालिदासेन विरचितं सन्देशकाव्यं किम्?

नाम ..............................................................................

**एकादशः पाठः - केरलकालिदासः।**

७. मयूरसन्देशस्य प्रतिपाद्यविषयः कः?

८. इदंप्रथमतया अनन्तपुरे कः क्रिक्कट् क्लब् इति समितीं स्थापितवान्?

९. केरलकालिदासः कदा कुत्र जनिम् अलभत?

8.**न केवलं किन्तु उपयुज्य वाक्यपरिवर्तनं करोतु।**

१. गीता गायिका। गीता नर्तकी च।
गीता न केवलं गायिका किन्तु नर्तकी च।

२. आकाशे चन्द्रः अस्ति। आकाशे नक्षत्राणि सन्ति।

३. गोविन्दः नर्तनं करोति। सः पटकथां लिखति च।

४. कानने पशवः सन्ति। कानने पक्षिणः सन्ति।

५. बालाः कथाः पठन्ति। बालाः कविताः पठन्ति।

नाम ..........................................................................

**एकादशः पाठः - केरलकालिदासः।**

9.**संभाषणं पठित्वा केरलकालिदासस्य योगदानम् अधिकृत्य टिप्पणिं लिखत।**

छात्रः - गुरवे नमः।

अध्यापकः - नमो नमः।

छात्रः - गुरो! कालिदासस्य केरलकालिदासस्य च कः सम्बन्धः?

अध्यापकः - महाकविः कालिदासः विश्वप्रसिद्धः संस्कृतकविरस्ति। अस्य अभिज्ञानशाकुन्तलं, रघुवंशं, कुमारसंभवम् इत्यादयः विश्वप्रसिद्धाः। अभिज्ञानशाकुन्तलस्य कैरलीविवर्तनेन प्रसिद्धः केरलवर्मावलियकोयितम्पुरान् महोदयः भवति केरलकालिदासः।

छात्राः - अनेन विरचिताः अन्ये ग्रन्थाः के?

अध्यापकः - विशाखविजयम्, क्षमापणसहस्रम्, यमप्रणामशतकम्, श्रीपद्मनाभपदपद्मशतकम्।

छात्राः - अनेन रचितं सन्देशकाव्यं किम्?

अध्यापकः - मयूरसन्देशं नाम काव्यं मणिप्रवालरीतिम् अवलम्ब्य अनेन विरचितं सन्देशकाव्यं भवति।

छात्रः - अस्य महाभागस्य अन्यानि योगदानानि कानि?

अध्यापकः - चिरं भाषापोषिणीसभायाः अध्यक्षः सः तिरुवनन्तपुरे प्रथमं क्रिक्कट् क्लब् स्थापितवान् च।

छात्रः - धन्यवादः।

नाम ..........................................................................



## एकादशः पाठः - केरलकालिदासः।

**टिप्पणिं लिखत।**